.. gaNeshAShTakam ..

# ॥ गणेशाष्टकम् ॥

श्री गणेशाय नमः ।
सर्वे उचुः ।
यतोऽनंतशक्तेरनंताश्च जीवा यतो निर्गुणादप्रमेया गुणास्ते ।
यतो भाति सर्वं त्रिधा भेदभिन्नं सदा तं गणेशं नमामो भजामः ॥ १॥
यतश्चाविरासीज्जगत्सर्वमेतत्तथाऽब्जासनो विश्वगो विश्वगोप्ता ।
तथेंद्रादयो देवसंघा मनुष्याः सदा तं गणेशं नमामो भजामः ॥ २॥
यतो वह्निभानू भवो भूर्जलं च यतः सागराश्चंद्रमा व्योम वायुः ।
यतः स्थावरा जंगमा वृक्षसंघा सदा तं गणेशं नमामो भजामः ॥ ३॥
यतो दानवाः किन्नरा यक्षसंघा यतश्चारणा वारणाः श्वापदाश्च ।
यतः पक्षिकीटा यतो वीरूधश्च सदा तं गणेशं नमामो भजामः ॥ ४॥
यतो बुद्धिरज्ञाननाशो मुमुक्षोर्यतः संपदो भक्तसंतोषिकाः स्युः ।
यतो विघ्ननाशो यतः कार्यसिद्धिः सदा तं गणेशं नमामो भजामः ॥ ५॥
यतः पुत्रसंपद्यतो वांछितार्थो यतोऽभक्तविघ्नास्तथाऽनेकरूपाः ।
यतः शोकमोहौ यतः काम एव सदा तं गणेशं नमामो भजामः ॥ ६॥
यतोऽनंतशक्तिः स शेषो बभूव धराधारणेऽनेकरूपे च शक्तः ।
यतोऽनेकधा स्वर्गलोका हि नाना सदा तं गणेशं नमामो भजामः ॥ ७॥
यतो वेदवाचो विकुंठा मनोभिः सदा नेति नेतीति यत्ता गृणन्ति ।
परब्रह्मरूपं चिदानंदभूतं सदा तं गणेशं नमामो भजामः ॥ ८॥
श्रीगणेश उवाच ।
पुनरूचे गणाधीशः स्तोत्रमेतत्पठेन्नरः ।
त्रिसंध्यं त्रिदिनं तस्य सर्वं कार्यं भविष्यति ॥ ९॥
यो जपेदष्टदिवसं श्लोकाष्टकमिदं शुभम् ।
अष्टवारं चतुर्थ्यां तु सोऽष्टसिद्धिरवानप्नुयात् ॥ १०॥
यः पठेन्मासमात्रं तु दशवारं दिने दिने ।
स मोचयेद्बन्धगतं राजवध्यं न संशयः ॥ ११॥
विद्याकामो लभेद्विद्यां पुत्रार्थी पुत्रमाप्नुयात् ।
वांछितांल्लभते सर्वानेकविंशतिवारतः ॥ १२॥
यो जपेत्परया भक्तया गजाननपरो नरः ।
एवमुक्तवा ततो देवश्चांतर्धानं गतः प्रभुः ॥ १३॥
इति श्रीगणेशपुराणे उपासनाखंडे श्रीगणेशाष्टकं संपूर्णम् ॥

proofread by Karthik Chandan.P (kardan5380@yahoo.com)
Amith K Nagaraj (amithkn@rediffmail.com)

Please send corrections to sanskrit@cheerful.com
Last updated April 5, 2004